श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितं

# ॥ श्रीलक्ष्मीनारायणस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनारायणस्तोत्रम् ॥

सत्यव्रतक्षेत्रललामभूतो
बाहासरित्तीरविराजमानः।
मखिप्रकृष्टोह्यरशाणिपाले
नारायणो यत्र विभाति लक्ष्म्या ॥ 1 ॥

आत्रेयगोत्रांबुधिपूर्णचन्द्रैः
आचारशीलैरभितो वरिष्ठैः।
आशास्यमानः परभक्तियुक्तैः
नारायणो भाति सहैव लक्ष्म्या ॥ 2 ॥

श्रीवैष्णवाग्रेसरमाननीयाः
आचार्यवर्या जगति प्रसिद्धाः।
सत्संप्रदायावनबद्धदीक्षाः
त्वया प्रदात्ता जगतां विभान्ति ॥ 3 ॥

भाग्यं जगत्यामुपवर्णनीयं
त्वदीयसेवाफलमामनन्ति।
अस्तोकदिव्याध्वरवेदिभोग्ये
जानेऽग्रहारे तव भाग्यमेतत् ॥ 4 ॥

इष्टार्थसिद्ध्यै भवतोपदिष्टं
इष्ट्यादिकं भूरि कृतं हि यत्र।
यज्ञो हि नारायणनामरूपः
त्वमत्र भासीति विभावये त्वाम् ॥ 5 ॥

आत्रेयगोत्रैकजनिप्रकृष्टाः
  द्विजा द्विजत्वं प्रतिपद्यमानाः।
भूयस्तरां विष्णुपदे चरन्तः
  विभान्ति तुष्टस्त्वमिहासि भूत्यै॥ 6॥

नारायण त्वं रमया समेतः
  प्राचीं दिशं वीक्ष्य मुहुः प्रसन्नः।
कुतो न जाने परमं रहस्यं
  यूपोज्वलं स्तम्भमवेक्षसे किम्!॥ 7॥

यज्ञस्य साक्षी स्थिर एव लोके
  यज्ञस्थली चापि विभाति सुस्था।
ततोऽभिजातावसतोऽग्रहारः
  विश्वप्रसिद्धोऽप्यधुना त्वयैव॥ 8॥

काञ्च्युत्तराचोत्तमतां प्रणीता
  यज्ञैर्हि सज्जैः किल यायजूकैः।
अत्र्यन्ववायान्वयविद्वदग्र्यैः
  सुस्वध्वरैरध्वरवेदिदीप्रैः॥ 9॥

श्रीवादिहंसांबुदसूरिवर्य
  वंशावतंसैः किल विप्रवर्यैः।
श्रीश्रीनिवासाध्वरिभिः प्रतिष्ठां
  प्राप्तोऽग्रहारोह्यरशाणिपालै॥ 10॥

प्रतिष्ठितस्त्वं निजभूम्नि नित्यं
  प्रतिष्ठितस्त्वं परमाग्रहारे।
पुनः प्रतिष्ठा भवतः प्रशस्या
  चिराय नारायण! सन्निधत्स्व॥ 11॥

यमप्ययं प्राह्वयतिस्म हृष्टो
    वरप्रदो वारणशैलमूर्ध्नि।
देवाधिराजोऽप्ययदीक्षितोऽसौ
    कूटस्थ एवाभवदत्रिगोत्रे॥ **12**॥

कल्याणकुल्या कमनीययूपः
    कार्श्यं कुतः प्राप न वेद्मि तत्त्वम्।
क्षमस्व सर्वानपराधवर्गान्
    ऋद्ध्यै समीक्षस्व सुधाकटाक्षात्॥ **13**॥

कल्याणकुल्यामृतवाहिनी स्तात्
    यूपः समुच्छ्रायमुपैतु भूयः।
त्वदीयधामोज्वलतामुपेयात्
    आराधनं ते नवतां प्रदद्यात्॥ **14**॥

काञ्चीघटांब्वित्यभिधानभाजः
    श्रीवेङ्कटाचार्यमुखाः कवीन्द्राः।
यत्सन्निधानात् अतुलां प्रतिष्ठां
    संप्राप्य नारायण संविभासि॥ **15**॥

दभ्रेतरे धामनि वर्धमानो
    दभ्रं परं धाम समाश्रितोऽसि।
अदभ्रदृष्ट्या स्वयमेधमानः
    भद्राणि नारायण संविधेयाः॥ **16**॥

विधिप्रणीते सुभगेऽश्वमेधे
    समुद्भवन् श्यामलहव्यवाहः।
अस्तोकभोग्याध्वरहव्यभोक्ता
    नयत्यहो तान् स्वपुरं स्म देवः॥ **17**॥

कलिः प्रदुष्टः कवयोऽपि नष्टाः
    कल्याणकुल्याप्यमृतेन हीना।
जाताश्च दूरे सुखजीविकायै
    परन्तु नारायण सुस्थिरोऽसि॥ **18** ॥

पूतोऽग्रहारो मखजालकृत्या
    पूता स्थली सत्पदरेणुपूर्णा।
पूता वयं ग्रामसुनामधृत्या
    वसेम नारायण ते कटाक्षैः॥ **19** ॥

श्रीसूक्तहोमेन कृतेन भक्त्या
    ग्रामस्समृद्धिं सकलामुपैतु।
देवस्समाराधनसंप्रहृष्टः
    अभीष्टदायी सततं विभातु॥ **20** ॥

अत्र्यन्ववाये जनिमेत्य सेवा
    रतेन मावासरघूत्तमेन।
भक्त्या कृतं स्तोत्रमिदं पठन्तः
    लक्ष्मीकटाक्षेण विभान्तु लोके॥ **21** ॥

लक्ष्मी नारायणं देवं मन्दिरं नूत्न निर्मितम्।
रक्षितां यागशालां च दृष्ट्वा तुष्टिं भजेमहि॥ **22** ॥

॥ इति श्रीलक्ष्मीनारायणस्तोत्रं समाप्तम्॥